क्रम सं० ३४ ६.५

विषय: धर्मशास्त्रम्

प्रवेश सं० ४०४४५

ग्रन्थकार

नाम षण्णवतिश्राद्धनिर्णय:

पत्र सं० १-१३.

अक्षर सं० (पंक्तौ) २६.

पंक्ति सं० (पृष्ठे) ९.

श्लोक सं०

लिपि: दे.ना. शके. १७१२.

आधार: का.

आकार: ८.२" × ४.

वि० विवरणम्

पी० एस० यू० पी०—७७ एस० सी० ई०—१९५१—५० ००० 11860 १३/८४७.

Indira Gandhi National Centre for the Arts

॥अथ षणवतिश्राद्धप्रयोगः॥

Indira Gandhi National Centre for the Arts

षण्ण.न. ॥ श्रीगणेशायनमः॥ ॥अथषण्णवतिश्राद्धनिर्णयप्रस्तूयते॥तत्रसंग्र
॥१॥ हः॥अमामनुयुगक्रांतिधृतिपातमहालयाः॥अन्वष्टक्यंचपूर्वे
द्युःषणवत्यःप्रकीर्तिताः॥अस्यार्थः॥अमाःकृष्णपक्षांत्यतिथि
योद्वादश॥मन्वादयःप्रोक्ताहेमाद्रौ॥तिथ्यग्नीनातिथिस्तिथ्या
शोकृष्णेभोनक्लोग्रहाः॥तिथ्यर्कौनशिवोश्वोमातिथिमन्वादयो
मधोरिति॥चैत्रात्तिथिःपौर्णिमा॥अग्निस्तृतीया॥वैशाखेना
स्ति॥ज्येष्ठेपौर्णिमा॥आषाढेपौर्णिमा॥शुक्लादशमी॥श्रा
वणेकृष्णाष्टमी॥भाद्रेशुक्लतृतीया॥आश्विनेशुक्लनवमी॥ हेरंब
कार्तिकेपौर्णमासी॥शुक्लद्वादशीच॥मार्गशीर्षेनास्ति॥ ॥१॥

पौषेसितैकादशी॥माघेशुक्लसप्तमी॥फाल्गुनेदर्शपौर्णि
मा॥एवमेताः॥क्रमान्मन्वादयश्चतुर्दश॥युगादयउक्ता
रत्नावल्यां॥माघेपंचदशीकृष्णानभस्येचत्रयोदशी॥तृतीया
माधवेशुक्लानवम्यूर्जेयुगादयइति चतस्रः॥संक्रांतयःसू
र्यस्यद्वादशप्रसिद्धाः॥वैधृतयस्त्रयोदश॥व्यतीपातस्त्रयो
दश॥विष्कंभादिषुसप्तदशमः॥नतुयोगविशेषः॥तस्यकदा
चित्कत्वेनोक्तसंख्यापूरणानर्हत्वात्॥महालयाःषोडशतेच
भाद्रपदकृष्णेप्रोष्ठपद्यासह॥आश्विनसितप्रतिपदासहेति

Indira Gandhi National Centre for the Arts

धिव्यश्रवणेनसुक्तं विधित्रयंहेमाद्रौ॥अन्वष्टक्याअष्टको
त्तरदिनश्राद्धं॥चकारात्पूर्वेद्युरष्टकाश्राद्धंच॥तत्राष्टकाउक्ता
भगवताश्वलायनेन॥हेमंतशिशिरयोश्चतुर्णामपरपक्षा
णामष्टमीष्वष्टका इतितत्पूर्वेद्युश्राद्धंतदुत्तरेहि अन्वष्टक्यं
चेति षण्णवतीश्राद्धानिसर्पः॥यत्तुवैधृतयोद्वादश॥व्यतीपाता द्वादश॥महालयाः पंचदश॥अन्वष्टक्यादीनिपंचदश॥
शैसेवंषण्णवतिश्राद्धानितिव्याचख्युस्तदश्रद्धेयं॥त्रयो
दशवैधृतिव्यतीपातास्तकत्वंनियतंचांद्राब्दे इतिस्फुट

हेरंब
॥२॥

विरोधात्॥नक्षत्राब्दस्यद्वादशास्तकत्वेपिदार्शसंक्रा
मणादीनान्यूनत्वेनप्रकृतानुपयोगात्॥आदौमध्येव
सानेतुयत्रकन्यांव्रजेद्रविः॥सपक्षःसकलःपूज्यःश्रा
द्धषोडशकंप्रति॥इतिकार्ष्णाजिनीये॥कन्यागतेस
वितरियान्यहानितुषोडश॥क्रतुभिस्तानितुल्यानि
संपूर्णवरदक्षिणैरितिश्लोकगौतमीये॥नभस्य
स्यासितेपक्षेतिथिषोडशकंचयत्॥कन्यागतश्च
सूर्यस्यासफलःश्राद्धकर्मणि इतिबौधायनीये

Indira Gandhi National
Centre for the Arts

च॥ श्राद्धषोडशाख्यास्वग्रंथनिर्णीतविरोधात्॥ महालया
नां पंचदशत्वानुपपत्तेश्च॥ एतेन॥ शास्त्रेण तु हता ये वै ते
भ्यस्तत्र प्रदीयते॥ इतीतरदेवताबाधेन शस्त्रहतदेव
तात्वविधानात्॥ तदभावे लुप्यते का[illegible]जिनीयादिवाचां
सि शस्त्रादिमृतपितृकाधिकारिकश्राद्धेष्वेव षोडश
संख्य व्यवस्थापयंति॥ अतो देवाभावेन चतुर्दशीश्रा
द्धं लुप्यते इति मध्योक्तमवास्तं॥ दिनानि पंच चेत्साध्वी
नो वैश्वानराधिकरणन्यायेनावयुत्यानुवादत्वेनोप



पत्तेः पक्षांतरं नेति माधवीये स्पष्टं॥ तत्रपक्षांतरं काम्यइस
न्ये तथापि प्रकृतसंख्यापूरणं षोडशत्वं विनानुपपन्नमे
व॥ नभस्यापरपक्षे तु श्राद्धं कार्यं दिने दिने॥ नैव नंदादिव
र्ज्यं स्यान्नैव वर्ज्या चतुर्दशीमिति पर्युदासशास्त्रमपि प
क्षांतरेष्वेव व्यवतिष्ठतीति निर्णयामृतादौ स्पष्टं॥ अ शा
स्त्रामृतपितृ आधिकारीविषयत्व व्यवस्थापनं तु न
युक्तिसहं॥ शास्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते इ
ति अस्य शस्त्रमृतपित्रादिदेवताकश्राद्धस्य कर्मांत
रस्यैव तादृशाधिकारिणं प्रतिविधानोपपत्तेः॥ नचा

Indira Gandhi National
Centre for the Arts

षषा०प्र ॥७॥

स्यमहालयांगतेतश्राद्धस्यदिनांतरेपुनर्महालयकर्तव्यतायाः
सर्वग्रंथसंमतत्वात् ॥ पार्वणधर्मकपित्रादिदेवताकमहाल
विरुद्धैकोद्दिष्टधर्मोलिंगत्वाच्चैसकं नुप्रसक्त्या ॥ अन्वष्ट
क्यादीनांपंचदशोक्तिरपिकुलपितैव ॥ हेमंतशिशिरयो
रित्याश्वलायनसूत्रेणद्वादशस्यस्वयमेवोपपादित
त्वात् ॥ भाद्रपदापरपक्षगतानांनमुख्यष्टकात्वं ॥ एते
नमाघ्यावर्षप्रोष्ठपद्याअपरपक्षेइत्याश्वलायनोक्ते हेरंब
काष्टकाध्यमातिदेशोक्तैः कर्मभेदस्यस्पष्टत्वात् ॥ मा ॥७॥
घ्यावर्षाख्यंश्राद्धंस्वतंत्रमितिहरदत्तीयव्याख्याने

वसंभवएवतस्मादस्मद्युक्तव्याख्यैवज्यायसीति ॥ अथै
षांकालाः ॥ दर्शोमहालयाष्टकान्वष्टक्यपूर्वेद्युःश्राद्धान्य
पराह्णे तत्राष्टकाश्राद्धे अष्टम्यांअपराह्णगामित्वनि
यमः ॥ तदनुरोधेनपूर्वोत्तरयोर्दिनयोःपूर्वेद्युरन्व
ष्टक्यंयुगमन्वादयःशुक्लपक्षगाःपूर्वाह्णे ॥ कृष्णपक्ष
गाअपराह्णे ॥ संक्रांतयःसंक्रांतिनिर्णयोक्तपर्वकाल
गाः ॥ वैधृतिव्यतिपातौतुकुपव्यापिनौदिनद्वये
सत्वेअसत्वेचपरदिनगौ ॥ मलमासेप्यमामन्वयु
गवैधृतव्यतिपातश्राद्धानिकार्याणि ॥ महालया

Indira Gandhi National
Centre for the Arts

षष्ठा०प्र० ष्टकादीनिनकार्याणि॥ ॥अथैषांपिंडनिर्णयः॥ तत्रयुगा
॥५॥ दिमन्वादिसंक्रांतिव्यतीपातवैधृतिश्राद्धानिपिंडरहिता
नि॥अमामहालयाष्टकादीनिसपिंडानि॥विवाहाद्यनंत
रममाश्राद्धमष्टमीश्राद्धंचपिंडरहितमेव॥तत्रापिम
हालयान्वष्टकाएववृद्धिःश्राद्धानिसपिंडान्येव॥गुर्विणि
पतिकर्तृकंमहालयश्राद्धमपिंडकं॥मुंडनंपिंडदानंच
प्रेतकर्मणिसर्वशः॥नजीवपितृकःकुर्यात्॥गुर्विणि हेरंब
पतिरेवचेतिदक्षोक्तेरितिनिर्णयसिंधुहेतिरत्ने ॥५॥

वक्लीकारादयः॥भट्टनीलकंठस्त्वस्यवचसोनिर्मूलतामाह॥
वस्तुतोस्यसमूलत्वेपि॥गयायांगंगयोश्चैवमृतायेचमहा
लये॥निषिद्धमपिकर्तव्यंपिंडदानंतिलार्पणं॥इतिपरशु
रामप्रतापीयस्मृत्यंतरोक्तेःसपिंडमेव॥अथदेवतानिर्ण
यः॥अन्वष्टक्यंपितृमातृसपत्नीकमातामहवर्गकंनवदै
वतंमहालयेतुसपत्नीकाःपितरोमातामहाश्चेतिद्विपा
र्वणं॥पितरोमातरःसपत्नीकामातामहाश्चेतित्रिपार्वणं
वासतिविभवेमातामहीपार्वणमपिपृथक्कुर्यात्॥इतिच
तुःपार्वणंवास्त्रिपार्वणंवास्त्रीपुत्रपितृव्यादिगुरुमित्रपर्यं

Indira Gandhi National Centre for the Arts

तंसकलैकोद्दिष्टदैवतसहितमेकपाकेनकुर्यात्॥शेषाणिस
पत्नीकपितृमातामहवर्गद्वयात्मकषट्दैवतानीति॥स्त्री
पुत्रपितृव्यादिशून्यंषट्नवद्वादशान्यतमदेवताकत्वो
क्तिर्निर्मूला॥महालयेगयाश्राद्धे वृद्धौचान्वष्टकासुच॥
नवदैवतमेवेष्टंशेषंषट्पौरुषंविदुरितिश्राद्धहेमाद्रि
यं॥महालयेगयाश्राद्धेवृद्धौचान्वष्टकासुच॥ईयंद्वाद
शदैवसंतीर्थेप्रोष्ठेमघासुचेतिनिगमवाक्यंचसवि
तिभवेद्दर्शादिवृद्धिपार्वणकर्तव्याकर्त्तकंअतएवोक्तं हेरंब
शेषंषट्पौरुषंविदुरिति॥अन्यथाउपाध्यायगुरुश्वशुर ॥६॥

पितृव्याचार्यमातुलद्युपक्रम्य॥सखिद्रव्यदशिष्यास्ती
र्थे चैवमहालये॥एकोद्दिष्टविधानेनपूजनीयाःप्रयत्नतइति
आदिहेमाद्रियपुराणोक्तेर्वैयर्थ्यापत्तेः॥अतएवनिर्णया
मृतेमहालयादौपृथक्सहवाभर्तृनिरित्यादिनापार्व
णदेवतानिर्णीयतत्रैकस्मिन्नेवकालेएकेनैवपाकेनै
कएवकर्त्ताभ्रातादिनामेकोद्दिष्टविधानेनश्राद्धानि
कुर्यात्॥इत्युक्त्वाआचार्यगुरुशिष्येभ्यएवचेत्यादि
एकस्मिन्ब्राह्मणेसर्वानाचार्यादीन्प्रपूजयेदित्युदा
हृतं॥एकस्मिन्ब्राह्मणइसशास्त्रविषयंब्राह्मणाविष

Indira Gandhi National
Centre for the Arts

षष्ठा०प्र
॥७॥

यं चेति तत्रैव निर्णीतं ॥ तस्मात्सार्वर्णिको दिष्टदेवतासमुच्चयात्
को महालय इति सिद्धं ॥ विश्वे देवास्त्विष्टम्यां कामकालौ पूर्वे
धुरिलोचनावपि चाष्टम्यां दर्शादिषु सर्वेषु पुरूरवआर्द्रवौ कन्यासंक्रम
निमित्तश्राद्धे धुरिलोचनौ महालये धुरिलोचनावित्केचि
त् ॥ तच्चिंत्यं ॥ अपि कन्यागते सूर्ये काम्ये तु धुरिलोचनौ इत्य
त्र राहूपरागे स्नायादितिवत् कन्यागते सूर्ये इति सप्तम्य हेरंब
र्थस्य निमित्तत्वेन निमित्तानंतरं नैमित्तिकस्यौचित्यात् ॥
कन्यासंक्रमणनिमित्तश्राद्धे धुरिलोचनौ न महालय इ ॥७॥
ति दिक् ॥ ॥ अथानेकश्राद्धसंपाते तत्र प्रसंगनिर्ण

यः ॥ तत्रामामनुयुगक्रांतिवैधृतिव्यतीपाताष्टकानां तंत्र
त्वं ॥ समानां गप्रधानत्वात् ॥ अमामन्वादिसंक्रांतिश्राद्धा
नि तंत्रेण करिष्ये इति संकल्प्य हेमाद्रिः ॥ युगादिमन्वादीना
दर्शस्य प्रसंगसिद्धिः ॥ युगादिश्राद्धं करिष्ये ॥ इति काले दर्श
हात् ॥ महा तंत्रवद्दर्शेनाप्यतंत्रवतां युगमन्वादिसंक्रांत्या
दीनां प्रसंगसिद्धिः ॥ दर्शश्राद्धं करिष्ये ॥ इति महालये तं
त्रवत् एव कीर्तनमिति नव्याः ॥ तत्राविवाहाद्यनंतरद
र्शस्यापि उवे तंत्रमेव समतंत्रत्वात् ॥ महालयान्वष्टका
यो नं पूर्वोक्तैर्दर्शादिभिस्तत्र प्रसंगो वा ॥ दर्शादिषु स

Indira Gandhi National
Centre for the Arts

षण्णव॰प्र॰ पत्नीकैःपितृवर्गे दैवत्वे तु महालये नेतरेषां च दर्शादिनां प्रसं
॥८॥ ग एव ॥ दैवतैक्यात् मातामहतंत्रत्वाच्च ॥ अधिकं प्रविष्टं न तु तद्धा
निरिति न्यायेन दैवताधिक्ये पि विरोधाभावाच्च तादृशाम
हालय पूर्वेद्युः श्राद्धयोस्तंत्रत्वं ॥ न व देवता मकमहालया
न्वष्टक्ययोरपि तंत्रं ॥ पूर्वाह्णापराह्णादि कालभेदे तु तंत्र
प्रसंगो न स्तः ॥ यथा पूर्वाह्णगानां संक्रांतीनां शुक्ल म
नुयुगादीनां दार्शिकेन यथा वा ॥ शुक्ल मनुयुगादीनां
पौर्वाह्णिक संक्रांत्या पूर्वाह्णगानां तु भवति ॥ तत्र प्रसंगो वा ॥ हेरंब
एवं वैधृति व्यतीपातयोर्माध्याह्णिक संक्रांतेश्च न दर्शे ॥८॥

न ॥ एवमन्यत्राप्यूह्यं ॥ अथ तर्पणनिर्णयः ॥ तत्रामाम
नुयुगक्रांति धृतिपातेषु श्राद्धात्पूर्वं णं तर्पणं कार्यं ॥
पूर्वेद्युरन्वष्टकासु महालयश्राद्धेषु च प्रतिदिनं प्रयो
गांते ॥ अष्टकाविकृतिमाघ्यावर्षे श्राद्धे ष्वप्येवं ॥ यत्तु
सप्तम्यन्वष्टक्ययोर्दर्शविकृतित्वात्पूर्वं तर्पणं कार्यं ॥
तद्विकृतित्वान्नंगीकारेते तर्पणानुष्ठानामिति ॥ तन्न ॥
अष्टकास्वित एव हीति नियमात् तद्धर्मत्वेन तद्धर्मौचित्या हेरंब
त् ॥ अष्टकास्विति बहुवचनस्य लिंगसमवायन्या ॥

षण्णवती
॥ ४॥

येनाष्टकादिवितयपरत्वेनां तत एव तर्पणस्याविहितत्वात्॥
येनाष्टकादिवितयपरत्वेनां तत एव तर्पणस्य विहितत्वात्॥ असकृन्महालये तत्पक्षे षंते॥
प्रयोगरत्नादिसंवादाच्च॥ असकृन्महालये तत्पक्षे षंते॥
सकृन्महालये परे घुसिति॥ संपाते तु यादृश श्राद्धानंत
त्रप्रसंगो वा निर्णीतस्तेषां तर्पणे पितथैव तंत्र प्रसंगो॥
श्राद्धावृत्तौ तु तर्पणस्याप्यावृत्तिरुक्तप्रकारेणादावंते
वा॥ यत्र महालये दर्शादि श्राद्धं तंत्रानुष्ठानं॥ तत्र पू
र्वं दर्शादि तर्पणं कृत्वा श्राद्धांते महालय तर्पणं॥ यत्र हेरंब्र
श्राद्धात्पूर्वं दर्शादौ तर्पणंमभिहितं तत्र ब्रह्मयज्ञां॥ ४॥

ग तर्पणं अनंतरं पृथक् कुर्यात्॥ नित्यतर्पणेन प्रसंग
स्तंत्रं वा॥ ये तु दर्शश्राद्धादौ ग्रहकालत्वे नित्य तर्पणस्य प्रयो
गांतःपातित्वात् समान तंत्रता चक्षते॥ अन्ये तु सद्यस्काल
त्वेपि प्रयोगबहिर्भूतस्यापि तंत्रत्वं॥ अन्यांगैरन्यांगानां प्र
संगसिद्धेः॥ पशुपुरोडाशादावभ्युपगमात्॥ पूर्वं तिलो
दकं दत्वा अमाश्राद्धं तु कारयेदिति कौप्रसयेन प्रयोग
बहिर्भूतमंगानुष्ठानस्यारंभणीया बृहस्पतिसवादावभ्युपगमाच्चेदमपि प्रयोगबहिर्भूतमेवांगपूर्वं कार्यं॥

Indira Gandhi National
Centre for the Arts

ष॰ग॰श्रा॰ अतः प्रसंगानुष्ठानमविरुद्धमित्याहुः ॥ तदुभयमप्यसत् ॥
॥१०॥ भिन्नमात्पितृवर्गयोः भिन्नयोर्देवतावं दर्शादौ सपत्नीकपि
त तृवर्गस्येति देवताभेदात् ॥ औरेवदार्शिकाब्दिकयोरीदृशा
देवताभेदमादायैव ॥ संपाते देवताभेदमादायैव ॥ संपाते
देवताभेदाच्छ्राद्धयुग्मं समाचरेदितिउक्तं ॥ यत्र प्रत्याब्दिकं
महालयादौ परेऽहनि तर्पणं ॥ प्रातः संध्यांते तर्पणं कृत्वा पुनः
स्नात्वा शेषमाह्निकं कुर्यात् ॥ स्नात्वा तीरं समागत्य उपविश्य हेरंबू
कुशासने ॥ संतर्पयेत्पितॄन् सर्वान् स्नात्वा वस्त्रं च धारयेत् ॥ इ ॥१०॥
त्युक्तं संग्रहोक्तेः ॥ यत्तु श्राद्धीयतर्पणानंतरं प्रातःस्नानं

संध्याधिकारमिति तत् ॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्व
कर्मस्विति अन्यकर्मणि संध्यां विनाधिकाराभावस्योपपा
दितत्वात् ॥ पूर्वेदिवानुष्ठेयप्रसवरोहणं गस्यापि सूर्योपस्था
नस्य ॥ प्रातर्होमानंतरमनुष्ठानदर्शनाच्चोपेक्ष्यं कुशासं
स्नानतर्पणांते स्नानं चेति द्वयं विछेयं ॥ शेषोऽनुवादः सर्वोनि
तिश्राद्धदेवतास्तता ॥ नित्यर्थः ॥ इतरेषामप्रसक्तेः ॥ महाल
यानां हि पार्वणकत्वे तदीयतर्पणेन सप्तम्यष्टमीश्राद्धी
गतर्पणस्य प्रसंगासिद्धिः ॥ नवमीश्राद्धस्य माहालय

Indira Gandhi National Centre for the Arts

षण०प्र०
॥११॥

नां त्रिपार्वणं कृते तेन नवमी श्राद्धस्य प्रसंगो नेतरयोः ॥ यत्र तु
महालयादावेते तु तर्पणं वैश्वदेव [illegible] श्राद्धोत्तेतत्र तर्पणं
त्वैव वैश्वदेवः कर्तव्यः ॥ प्रमादात्तर्पणाकरणे वैश्वदेवांते ब्र
ह्मयज्ञकरणेन च कामं भवतु प्रसंगस्तंत्रं वा ॥ विवाहाद्यानंत
र्ये विवाहादि प्रयुक्तं सतिल मिश्रतर्पणनिषेधे तत्राप्यावृत्ति
रिति संक्षेपः ॥ अथ श्राद्धविघ्ननिर्णयः ॥ पन्यारजस्वला हेरंब
यां दर्शादिव्यतीपातांतानि श्राद्धान्यामेन कार्याणि ॥ श्राद्ध
विघ्ने द्विजातीनां आमश्राद्धं प्रकीर्तितं ॥ अमावास्यादिनि ॥११॥

यतं मासु संवत्सराद्दते इति हारीतोक्तेः ॥ नियतं निसाकरणे
प्रसवायहेत्वादिना व्यतीपातादि संग्रहः ॥ शुद्धपत्न्यंतरसत्वे
नैनैव ॥ महालयस्त्वं नैनैव ॥ मृताहं च सपिंडं च गया श्रा
द्धं महालयं ॥ आपन्नोपि न कुर्वीत श्राद्धमामेन कर्हिचित् ॥
इति स्मृतिदर्पणे गालवोक्तेः ॥ सकृन्महालये दिनांतरे स्नो
तायां कुर्यात् ॥ सर्वेषु श्राद्धस्यापि तु पितृव्य सतंत्रत्वात् ॥ तस्य
पत्न्यनालंभुकत्वे कर्तृ [illegible] मते सर्वेषुः प्रच्युतिश्राद्धत्रयमंते
नैव ॥ सूतकेतु दर्शादीनां लोपः ॥ सूतकांते प्रायश्चित्तं कु

Indira Gandhi National
Centre for the Arts

षण्णव०प्र० ॥१२॥

यात्॥ महालयं यथासंभवपंचमीदशम्यादिपक्षमवलंब्य
सर्वथा अपरपक्षादतिक्रमे यावत् वृश्चिकसंक्रमं सकृन्मह
लयं कुर्यात्॥ अष्टका अप्युक्तान्यतममासे सकृत् कुर्यात्॥
षोडशीमहालयश्राद्धानां एकाकर्मप्रतिपद्यारंभोत्तरद्वि
तीयादिप्रयोगमनुकारयेत्॥ पक्षांतरे प्रक्रांते पितृकृतकां
ते प्रायश्चित्तमेव॥ अथ षण्णवतीश्राद्धकर्मोशक्तौ अमा
श्राद्धं भाद्रामावास्यायां अन्यस्यां वा सकृन्महालयं
यथाविभवं पंचम्याद्यन्यतमपक्षेण कार्यं॥ तेषु च तु

हेरंब ॥१२॥

षण्णव०प्र० ॥१३॥

द्धा स्रा कुकुर्यात्॥ अनाहिताग्निरतेश्राद्धशेषेण॥ अत्रसर्वत्राविधा
यकवाक्यानि न्यायाश्च सर्वत्र प्रसिद्धा इति नात्र लिखिता इति
दिक्॥ श्रीमच्चातुर्धरगोविंदसूरिसूनोः शिवस्य कृतौ षण्ण
वतीश्राद्धनिर्णयः समाप्तः॥ शके १७१२ साधारणनामसं
वत्सरे पौषशुद्ध ११ तद्दिने चितळोपनामक रामचंद्रसुत
त्र्यंबकेन लिखितं स्वार्थं परार्थं च श्रीगजाननार्पणमस्तु॥
श्रीराजारामरामरुक्माय नमः श्रीः॥ श्रीगजानन जयति॥

हेरंब ॥१३॥

Indira Gandhi National Centre for the Arts

र्यात्॥ महालयं यथासंभवं पंचमीदशम्यादिपक्षमवलंब्य
सर्वथाऽपरपक्षादतिक्रमे यावद्वृश्चिकसंक्रमं सकृन्महा
लयं कुर्यात्॥ अष्टकाअप्युक्तान्यतममासे सकृत् कुर्यात्॥
षोडशमहालयश्राद्धानां एकाकर्मप्रतिपद्यारंभोत्तरं द्वि
तीयादिप्रयोगमनुकारयेत्॥ पक्षांतरे प्रक्रांतेपि स्मृतकां
ते प्रायश्चित्तमेव॥ अथ षण्णवतीश्राद्धकर्माशक्तौ अमा
श्राद्धं भाद्रामावास्यायां अन्यस्यां वा सकृन्महालयं
यथाविभवं पंचम्याद्यन्यतमपक्षेण कार्यं॥ तेषु चतु



चतुर्दशीवर्ज्या॥ सकृन्महालयेन नंदादयो वर्ज्याः॥ ग्रंथां
तरे प्रसिद्धाः॥ अमापाते भरण्यां च द्वादश्यां पक्षमध्यगे॥
तथा तिथिं च वारं च नक्षत्रं न विचारयेत्॥ इति प्रयोगपा
रिजाते हेमाद्र्युक्तेरमादौ न निषेधः॥ मृताहनिनिषे
धस्य चकारात् करणपक्षे चतुर्दश्यां मृताहत्वेन्यस्या
मिति निषिद्धायां तिथौ कुर्यात्॥ न चतुर्दश्यामिति का
लनिर्णयप्रकाशादौ उक्तं॥ यतीनां द्वादश्यामेव॥ अ
ष्टकाशक्तौ माघमास एव॥ तत्राप्यशक्तौ अष्टमीश्रा
द्धमेव कुर्यात्॥ वैश्वदेवमाहिताग्निर्भिन्नान्नेन श्रा

Indira Gandhi National
Centre for the Arts

षण्ण० प्र० द्वा स्त्रा कू कुर्यात् ॥ अनाहिताग्निरतेश्राद्धशेषेण ॥ अत्र सर्वत्राविधा
॥१३॥ यकवाक्यानि न्यायाश्च सर्वत्र प्रसिद्धा इति नात्र लिखिता इति
दिक् ॥ श्रीमच्चातुर्धर गोविंदसूरिसूनोः शिवस्य कृतौ षण्ण
वतीश्राद्धनिर्णयः समाप्तः ॥ शाके १७१२ साधारणनाम सं
वत्सरे पौष शुद्ध ११ तद्दिने चितळोपनामक रामचंद्रसुत
त्र्यंबकेन लिखितं स्वार्थं परार्थं च श्रीगजाननार्पणमस्तु ॥ हेरंब
श्रीराजाराम राम रुक्मायनमः श्रीः ॥ श्रीगजाननजयति ॥
॥१३॥